वेद-श्रुति-आम्नाय-संज्ञा-मीमांसा

(संस्कृत तथा भाषानुवाद सहित)

युधिष्ठिर मोमांसक

प्रकाशकः—
रामलाल कपूर ट्रस्ट
बहालगढ़
सोनीपत-हरयाणा

द्वितीय संस्करण ६००
संवत् २०४४
मूल्य Rs. 3/-

मुद्रकः—
श्री शान्तिस्वरूप कपूर
रामलाल कपूर ट्रस्ट प्रेस
बहालगढ़ सोनीपत-हरयाणा

वेद-श्रुति-आम्नाय-संज्ञा-मीमांसा

अस्मिन् निबन्धे **वेद-श्रुति-आम्नाय-संज्ञानां** विषये विचारः क्रियते। मीमांसाशास्त्रे एषां पदानां बहुधा प्रयोग उपलभ्यते। आसां संज्ञानां विषये वैदिकेष्वनेकानि मतान्युपलभ्यन्ते। अत आसां संज्ञानां विषय इदं विचारणीयं भवति यदेतासां संज्ञानां को मुख्यार्थः। प्रथमं तावद् वेदसंज्ञाविषये विचार्यते—

वेद-संज्ञा-मीमांसा

वेदशब्दस्य विविधार्थानां विषये विचारणात् प्राग् वेदशब्दस्य स्वरूपविषये विचार आवश्यकः।

द्विविधो वेदशब्दः—मीमांस्यमानोऽयं वेदशब्दो वैदिकवाङ्मये द्विविध उपलभ्यते। एक आद्युदात्तः, अपरोऽन्तोदात्तः। तत्राद्युदात्तो वेदशब्दो ज्ञानपर्यायः, अन्तोदात्तश्च कुशमुष्टिनिर्मितस्य यज्ञीयपदार्थविशेषस्य वाचकः, इति तयोरर्थविभागमन्वाचक्षते वेदार्थविद आचार्याः।

आद्युदात्तस्य वेदशब्दस्य निर्वचनं वैदिकवाङ्मये नोपलभ्यते। अन्तोदात्तस्य त्वित्थं श्रूयते—

वेदेन वै देवा असुराणां वित्तं वेद्यमविन्दन्त तद्वेदस्य वेदत्वम्। तै० सं० १।७।४।६॥

तां (वेदिं) वेदेनान्वविन्दन्। तै० ब्रा० ३।३।९।१॥

तं (यज्ञं) वेदेनाविन्दंस्तद्वेदस्य वेदत्वम्। मै० सं० १।४।८॥

तां (वेदिं) वेदेनाविन्दंस्तद्वेदस्य वेदत्वम्। मै० सं० ४।१।१३॥

तां (वेदिं) वेदेनान्वविन्दंस्तद्वेदस्य वेदत्वम्। का० सं० ३१।१२॥

तं (यज्ञं) वेदेनान्वविन्दंस्तद्वेदस्य वेदत्वम् । का० सं० ३२।६।।

तां (वेदिं) वेदेनान्वविन्दंस्तद्वेदस्य वेदत्वम् । कपि० ४७।११।।

इह सर्वत्र दर्भमुष्टिनिर्मितयज्ञीयोपकरणविशेषवाचकस्यैव वेदशब्दस्य निर्वचनमिति तत्तत्प्रकरणानुशीलनेन सर्वथा विस्पष्टं भवति । शुक्लयजुःसंहितयोरपि वेदोऽसि० (मा० २।२१; का० १।७।५) इति मन्त्रे द्विः पठ्यमानोऽन्तोदात्तवेदशब्दोऽपि यज्ञप्रक्रियायां वेदसंज्ञकस्य यज्ञीयोपकरणस्यैव वाचक इति कात्यायनीये **'पत्नी वेदं प्रमुञ्चति— वेदोऽसीति'** इति (३।८।२) सूत्रे वेदप्रमुञ्चने तन्मन्त्रस्य विनियोगविधानाद् विज्ञायते ।

एतदेव च विमृश्य भगवता पाणिनिनाऽन्तोदात्तप्रकरणे **वेगवेदवेष्टबन्धाः करणे** इत्युञ्छादिगणसूत्रे (अ० ६।१।१५४) 'करणे' इति पदं निवेशितम् । करणाभिधेयादन्यत्र घञन्तो वेदशब्द आद्युदात्त इत्यर्थापत्त्यैवापद्यते । एवमजन्तस्य कर्त्रभिधेयस्य चित्वादन्तोदात्तत्वे प्राप्ते आद्युदात्तप्रकरणे **वृषादिगणे** (अ० ६।१।१६७) वेदशब्दस्य पाठो व्यधायि ।

इह निबन्धे मीमांस्यमानो वेदशब्दो ज्ञानपर्याय आद्युदात्त एव । अयमेव च वेदशब्द आधाराधेययोरभेदविवक्षया ज्ञानाधारे ग्रन्थेऽपि प्रयुज्यते । यद्यपि यौगिकार्थसामान्यमपेक्ष्य वेदशब्दो ग्रन्थमात्रे प्रयोगमर्हति, तथापि पङ्कजादिशब्दवदयं केषुचिदेव ग्रन्थेषु रूढ इति सार्वजनीनं मतम् ।

तत्र वेदशब्दः केषां ग्रन्थानां वाचक इत्यत्र बहोः कालाद् विवदन्ते विद्वांसः। तद्यथा—

एके मन्त्रसंहिता एव वेदा इत्यातिष्ठन्ते ।[1]

---

१. द्र०—'मन्त्रब्राह्मणयोर्वेदनामधेयम्' इत्यापस्तम्बीयश्रौतसूत्रव्याख्याने 'कैश्चिन्मन्त्राणामेव वेदत्वमाश्रितम्' इति धूर्तस्वामिनो वचनम्, 'कैश्चिन्मन्त्राणामेव वेदत्वमाख्यातम्' इति हरदत्तस्य वचनम्, ऋग्वेदादिभाष्यभूमिकायां च वेदसंज्ञाविचारप्रकरणे स्वामिदयानन्दस्य मतं च ।

अपरे मन्त्रब्राह्मणयोर्वेदनामेति संगिरन्ते ।[१]

अन्य आरण्यकोपनिषदामपि वेदेऽन्तर्भावमिच्छन्ति ।[२]

केचित् कल्पसूत्राणां पूर्वमीमांसासूत्राणां च वेदत्वमामनन्ति ।[३]

एके षडङ्गानामपि वेदत्वमभिलषन्ति ।[४]

एवं विवादास्पदीभूते वेदपदार्थे को नाम तस्य मुख्योऽर्थः, कश्च गौण इति जायते विचारणा ।

द्वयोरेवार्थयोर्विचारार्हता

उक्तेषु पञ्चस्वर्थेषु द्वावादिमावेव विवेचनार्हावर्थौ स्तः । तृतीयार्थस्वीकर्तारोऽपि आरण्यकोपनिषदां ब्राह्मणेष्वेवान्तर्भावं कृत्वा तेषां वेदसंज्ञामुररीकुर्वन्ति । चतुर्थोऽर्थस्तु कैश्चिदेव पारस्करसूत्रव्याख्यातृभिः स्वीक्रियते ।

---

१. 'मन्त्रब्राह्मणयोर्वेदनामधेयम्' इति कृष्णयजुःश्रौतसूत्रकाराणां वचनम् । 'मन्त्रब्राह्मणयोर्वेदशब्दः' इति कौषीतकिगृह्यवचनम् (३।१२।२३) इत्यादीनि च ।

२. उपनिषदः प्रायेणारण्यकान्तर्वर्तिन्यः, आरण्यकाना च ब्राह्मणैकदेशत्वं स्वीकृत्य मतमेतत् प्रसरति । आचार्यसायणेन ऋग्भाष्योपक्रमणिकादिषु उपनिषत्पर्यन्ता वेदसंज्ञा स्वीकृता ।

३. विधिर्विधेयस्तर्कश्च वेदः (पार० गृ० २।६।५) इति सूत्रव्याख्याने 'तर्कः कल्पसूत्रमिति भर्तृयज्ञः, तर्को मीमांसेति कल्पतरुः' इत्याह गदाधरः । हरिहरोऽपि कल्पतरोर्वचनमुद्दधार । विश्वनाथस्तु उक्तसूत्रव्याख्याने न्यायशास्त्रस्यापि वेदत्वमाह । यदाह—'तर्को न्यायमीमांसे अर्थवाद इति केचित्' इति ।

४. विधिर्विधेयस्तर्कश्च वेदः, षडङ्गमेकेन कल्पमात्रे (पार० गृ० २।६।५, ६७) । अत्र कर्कगदाधरयोर्व्याख्यानमप्यनुसंधेयम् । न कल्पमात्रे इतिसूत्रं तदैव संभवति यदा तर्कपदेन कल्पसूत्रमुच्यते । तदायमर्थः—न तावदेव कल्पसूत्रं समाप्यैव न, अपितु षडङ्गमध्ययनं समाप्येत्यर्थः ।

पञ्चमोऽर्थस्तु स्वयं सूत्रकृतैवैकेषां मतेनोपस्थापितः । तदेवमादिमयोर्द्वयोरेवार्थयोरवशिष्यते विचारार्हता । अतस्तयोः कतरोऽर्थो मुख्यः कतरश्च गौण इत्यधुना विचार्यते ।

'यत्परः शब्दः स शब्दार्थः' इति न्यायेन यः स्वाभाविकोऽपरिभाषितोऽर्थः स मुख्यः । यस्तु परिभाषितः स प्रयत्नार्हत्वात् कृत्रिमः, अत एवाप्रधानः । एवमेव योऽर्थः साहचर्यादिभिर्निमित्तै[1]रवगम्यते, सोऽपि नैमित्तिकत्वाद् गौण इति सार्वजनीनं मतम् ।

सत्येवम्, उभयोरर्थयोः कोऽर्थोऽपरिभाषितः, को वा परिभाषित इति जायते जिज्ञासा । **ऋग्यजुःसाम**मन्त्राणामध्ययने क्रियमाणे भवन्ति वक्तारः— **ऋग्वेदोऽधीयते, यजुर्वेदोऽधीयते, सामवेदोऽधीयते** इति । नहि कश्चिदपि मन्त्राणां वेदसंज्ञां प्रख्यापयितुं प्रायतत प्रयतते वा । ब्राह्मणग्रन्थानामुपनिषद्ग्रन्थानां वाऽध्ययने तु वक्तारो भवन्ति— **ब्राह्मणमधीयते, उपनिषदधीयते, यद्वा ऐतरेयमधीयते, बृहदारण्यकमधीयते** । न कश्चिदाह—ऋग्वेदोऽधीयते यजुर्वेदो वाऽधीयत इति । ब्राह्मणानां तु वेदत्वप्रख्यापनाय **'मन्त्रब्राह्मणयोर्वेदनामधेयम्'** इत्यादीनि बहूनि सूत्राणि तैस्तैर्ग्रन्थकृद्भिः सूत्रितानि । तत्र कारणं चिन्त्यम् ।

यद्युच्येत ब्राह्मणैः सह मन्त्राणामपि वेदत्वमुच्यते, न केवलं ब्राह्मणानामेवेति । सत्यम्, इह ब्राह्मणैः सह मन्त्राणामपि वेदसंज्ञा विधीयते, परन्तु यत्रास्याः पारिभाषिक्याः संज्ञायाः प्रवृत्तिर्नास्ति, तत्र वेदशब्देन मन्त्राणामेव ग्रहणाद् ब्राह्मणानां चाग्रहणाद् विज्ञायते वेदपदस्य मन्त्रा एव स्वाभाविकोऽकृत्रिमोऽर्थः, न तु ब्राह्मणमपि । तथाहि—

मन्त्रब्राह्मणयोर्वेदसंज्ञा कल्पसूत्रकारैर्विधीयते । न सा संज्ञा ब्राह्मणग्रन्थे-

---

१. न्यायसूत्रकृता सहचरणादीनि दश निमित्तानि अर्थान्तरबोधकानि सोदाहरणं परिगणितानि (द्र०—२।२।६१) ।

ष्वनुयोक्तुमर्हा, उभयेषां कालवैषम्यात् स्थितिवैषम्याद्वा[1] । तस्माद् ब्राह्मणग्रन्थेषु यत्र क्वचिदपि वेदशब्दः श्रूयते,स किम्पर इति जायते विचारणा । तन्निश्चयाय कानिचिद् ब्राह्मणवचनानि प्रस्तूयन्ते—

तानि ज्योतींष्यभ्यतपन्, तेभ्योऽभितप्तेभ्यस्त्रयो वेदा अजायन्त । ऋग्वेद एवाग्नेरजायत यजुर्वेदो वायोः सामवेद आदित्यात्……स ऋचैव हौत्रमकरोत् यजुषाध्वर्यवं साम्नोद्गीथमिति । ऐ० ब्रा० ५।३२॥

अत्रोपक्रमे वेदशब्दव्यवहार उपसंहारे च ऋग्यजुःसामशब्दानाम् । ऋग्यजुःसामशब्दाश्च मन्त्रवाचका[2] इति सार्वजनीनं मतम् । तेनोपक्रमे श्रूयमाणो वेदशब्दो मन्त्राणामेव वाचको भवितुमर्हति । न तत्र कथमपि ब्राह्मणानामन्तर्भावो वक्तुं शक्यते ।[3] अपि चात्रेदमपि ध्येयम्—यज्ञेषु मन्त्रा एव प्रयुज्यन्ते न ब्राह्मणानि ।[4] तेनेहोपक्रमोपसंहारयोरेकवाक्यतायै **'ऋचैव हौत्रमकरोत्'** इत्यादिषु न ब्राह्मणानामपि निर्देश इति शक्यं वक्तुम् ।

---

१. पाश्चात्यमतानुसारं ब्राह्मणानां कल्पसूत्राणां च प्रवचने कालभेदोऽस्ति । ब्राह्मणानि पौर्वकालिकानि कल्पसूत्राण्यौत्तरकालिकानि । नहि उत्तरकाले विहितस्य नियमस्य पौर्वकालिकेषु ग्रन्थेषु प्रवृत्तिः सम्भवति । भारतीयानां ब्राह्मणग्रन्थानां वेदत्वं स्वीकुर्वतां मते ब्राह्मणान्यपौरुषेयाणि कल्पसूत्राणि तु पौरुषेयाणि इति स्थितिभेदः ।

२. द्र०—यत्रार्थवशेन पादव्यवस्था सा ऋक्, गीतिषु सामाख्या, शेषे यजुःशब्दः । मीमांसा २।१।३५-३७ ।।

३. तेन ब्राह्मणग्रन्थेषु श्रूयमाणैर्ऋग्वेदयजुर्वेदसामवेदशब्दैर्मन्त्रसंहिता एवोच्यन्ते इति स्पष्टम् । तत्तत्प्रकाराणां मन्त्राणां बाहुल्येन सा सा संज्ञा द्रष्टव्या ।

४. **'विनियोजकं ब्राह्मणं भवति'** (द्र०—तै०सं० भट्टभास्करभाष्य भाग १, पृष्ठ ३, मैसूरसं०) । एतेन लक्षणेन ब्राह्मणानि तत्तत्कर्मसु मन्त्राणां विनियोग-

एतदर्थस्योपष्टम्भाय शबरस्वामिनोद्धृतः कस्यचिद् ब्राह्मणग्रन्थस्य पाठोऽप्युपस्थाप्यते—**'तेभ्यस्तेपानेभ्यस्त्रयो वेदा अजायन्त। अग्नेर्ऋग्वेदो वायोर्यजुर्वेद आदित्यात् सामवेदः····· ···। उच्चैर्ऋचा क्रियते, उच्चैः साम्ना, उपांशु यजुषा इति'** (शाबरभाष्य ३।३।२)।

अत्राप्युपक्रमे वेदशब्द उपसंहारे च ऋग्यजुःसामशब्दा उपलभ्यन्ते। परन्त्वयमत्र विशेषः—इह ऋग्यजुःसाम्नां य उच्चैस्त्वाद्युच्चारणधर्मो विधीयते, स तत्तद्वेदपठितानां मन्त्राणामेव, न तु ब्राह्मणवचनानामपीति सर्वस्वीकृतो राद्धान्तः। अत एतादृशेषु वचनेषु ब्राह्मणानां वेदत्वमभिप्रपन्ना याज्ञिका अप्यत्र वेदशब्देन ब्राह्मणानां ग्रहणं न स्वीकुर्वन्ति।[१]

एवं च कृत्वा ब्राह्मणवचनेषु श्रूयमाणो वेदशब्दो मन्त्राणामेव वाचक इति सिद्धम्। मन्त्राणां च वेदसंज्ञाविधायकं न किमपि वचन ब्राह्मणग्रन्थेषूपलभ्यते, तेन ज्ञायते यत् वेदपदस्य मन्त्रा एव मुख्योऽर्थो, न तु ब्राह्मणानि। कल्पसूत्रकारैस्तु स्वशास्त्रकार्यनिर्वाहाय यथान्या बह्व्यः संज्ञाः परिभाष्यन्ते, तथेयमपि तेषां पारिभाषिकी वेदसंज्ञा। **पारिभाषिकोऽर्थो न मुख्यो भवति, तस्य विशेषरूपेण परिभाषणात्।** तदेवं मन्त्राणामेव मुख्या वेदसंज्ञा, न ब्राह्मणानामपीत्ययमर्थः सिद्धः। उक्तमतस्य (अर्थाद् ब्राह्मणग्रन्थान्तर्गतो वेदशब्दो मन्त्रपर एव)

मात्रं दर्शयन्ति। विनियोजकानां विधिवाक्यानां शेषा अर्थवादाः। ते च विधिं स्तुवन्तस्तदेकवाक्यतामापद्यन्त इति मीमांसकानां मतम्।

१. उपसंहारानुरोधेनोपक्रमेऽर्थसंकोचो भवतीति केचित् वक्तुं शक्नुवन्ति। परन्तु ब्राह्मणग्रन्थेषु प्रयुज्यमानो वेदशब्दो ब्राह्मणान्यप्युपसंगृह्णातीत्यत्रैव न किञ्चिन्मानम्। तथा सति अर्थसंकोचस्य कथैव दूरेऽपास्ता (एतेन ब्राह्मणग्रन्था अप्यपौरुषेया इत्यपि मतमपास्तं भवति)। यदि दुर्जनसन्तोषन्यायेन उपक्रमे ऋग्वेदादिपदेषूपसंहारानुरोधेनार्थसंकोचः स्वीक्रियते, तथा सति उपक्रमे प्रयुक्तैर्ऋग्वेदादिपदैर्यो मन्त्ररूप एवार्थो गृह्यते, तस्यैवापौरुषेयत्वमेभिर्वचनैः सिद्ध्यति, न ब्राह्मणानामपि

दाढर्चाय भगवतः शङ्कराचार्यस्य वचनमिह प्रस्तूयते । **एवं वा अरेऽस्य महतो भूतस्य निःश्वसितमेतद् यदृग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरस इतिहासः पुराणम्** । इत्यादि बृहदारण्यकोपनिषदः (२।४।१०) श्रुतिं व्याचक्षता शङ्कराचार्येण प्रत्यपादि—**यदृग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरसश्चतुर्विधं मन्त्रजातम्** इति ।

अत्र शङ्कराचार्येण वेदपदघटितानाम् ऋग्वेदादिशब्दानां **चतुर्विधं मन्त्रजातम्** इति विलिख्य ऋग्वेदादिपदैर्मन्त्रा एवोच्यन्ते इति स्पष्टीकृतम् । अस्यैव मतस्य दाढर्चाय "मन्त्रब्राह्मणयोर्वेदनामधेयम्" इति वचनस्य विशेषेण विवेचना क्रियते—

"मन्त्रब्राह्मणयोर्वेदनामधेयम्"

ये खलु वैदिका विद्वांसो मन्त्राणामिव ब्राह्मणानामपि वेदत्वमुररीकुर्वन्ति, तेषां प्रधानालम्बनभूतं तत्रभवतां श्रौतसूत्रकाराणां "मन्त्रब्राह्मणयोर्वेदनामधेयम्" इति प्रसिद्धं वचनम् । तत्र खल्वस्मिन् निबन्ध इदमेव सूत्रमवलम्ब्य विचार्यते—किमनेन सूत्रेण मन्त्राणामिव ब्राह्मणानामपि वेदत्वं सिद्धयति, न वा । तदर्थं तावत् सूत्रमिदं कैः कैराचार्यवर्यैः स्वीयश्रौतसूत्रेषु पठितं कैर्न, यैश्च पठितं तत्र तादृशवेदसंज्ञाविधाने तेषां किं प्रयोजनं चेति विस्तरेण विविच्यते—

कृष्णयजुषः श्रौतसूत्रेष्वेव—उक्तसूत्रं कृष्णयजुःशाखा[1]सम्बद्धेष्वापस्तम्ब-सत्याषाढबौधायना[2]दिश्रौतसूत्रेष्वेवोपलभ्यते । ऋक्शुक्लयजुःसामवेदानां च

---

१. यजुषां शुक्लकृष्णद्विरूपाभिधाने को हेतुरिति 'यजुषां शौक्ल्यकार्ष्ण्य-विवेकः' इति नाम्नि निबन्धे निपुणतरमुपपादितम् । द्र०—वैदिक सिद्धान्त-मीमांसा, पृष्ठ २३-२३५ ।

२. काण्वशतपथसम्पादकेन 'कालेण्ड' महोदयेन बौधायनसूत्रस्य काण्व-यजुषा सह सम्बन्धः प्रतिपादितः, स च सुदृढानां प्रमाणानामभावे नास्मभ्यं रोचते ।

यान्याश्वलायनशाङ्खायनकात्यायन[1]द्राह्यायणलाटचायनप्रभृतीनि श्रौतसूत्राण्युपलभ्यन्ते, तेषु न क्वचिदपि सूत्रमिदम् एतदर्थकं वा वचनान्तरमुपलभ्यते। अतः सन्दिह्यते—किमत्र कारणं, येन कृष्णयजुषां श्रौतसूत्रेष्वेव सूत्रमिदमुपलभ्यते नर्ग्वेदशुक्लयजुःसामसंहितानामिति ? एतादृशे विशिष्टे वैषम्ये कारणेन केनचिदवश्यं भवितव्यम्।

विषमतायाः कारणम्—अस्या विषमतायाः कारणे विमृश्यमाणेऽस्माभिरयं हेतुरवगतः—'ऋक्सामयोः सर्वासूपलब्धासु संहितासु नास्ति ब्राह्मणस्य लेशतोऽपि संसर्ग इति सार्वलौकिकं मतम्। शुक्लयजुषः काण्वमाध्यन्दिनसंहितयोः कैश्चिद् ब्राह्मणभागोऽभिप्रेयते। तस्य चैकमात्रमवलम्बनं तदीयं कात्यायननाम्ना प्रसिद्धं सर्वानुक्रमसूत्रम्।[2]

कृष्णयजुषां यावत्यः शाखा उपलभ्यन्ते, तासु सर्वास्वेव मन्त्रब्राह्मणयोः सह समाम्नानं वर्तते। अतः यासु संहितासु केवलं मन्त्राण्येव[3] पठ्यन्ते, तासां सूत्रकारैर्**मन्त्रब्राह्मणयोर्वेदनामधेयम्** इत्येतादृक् सूत्रं न पठितम्, यासु च कृष्ण-

---

१. शुक्लयजुःसबन्धिनी द्वे प्रतिज्ञापरिशिष्टसूत्रे। तयोरेकं श्रौतसम्बन्धिष्वष्टादशसु परिशिष्टेषु तृतीयपरिशिष्टात्मकम्, अपरं शुक्लयजुःप्रातिशाख्यसम्बन्धि। नत्र कात्यायनश्रौतसूत्रे तदीयेषु वा परिशिष्टेषु नदं 'मन्त्रब्राह्मणयोर्वेदनामधेयम्' सूत्रमुपलभ्यते, किन्तु शुक्लयजुषः प्रातिशाख्यसम्बन्धिनि प्रतिज्ञापरिशिष्टे सूत्रमिदं दृश्यते। कृष्णयजुःसम्बन्धिषु तु प्रायेण सर्वेष्वेव श्रौतसूत्रेषु। तत्रापि परिभाषाप्रकरणे सूत्रमिदं समुपलभ्यते इति स्थितिवैलक्ष्यमप्यत्र ध्येयम्।

२. इदं सर्वानुक्रमसूत्रं न महर्षिकात्यायनविरचितमपि तु केनचिदर्वाचीनेन लेखकेन कात्यायननाम्ना प्रसिद्धीकृतमित्यन्यत्रास्माभिर्निपुणतरमुपपादितम्। द्र०—'वैदिक-सिद्धान्त-मीमांसा'ग्रन्थे 'मूल यजुर्वेद'शीर्षको निबन्धः पृष्ठ २४५-२४६।

३. मन्त्रशब्दस्य पुंस्त्वं प्रायिकम्, नपुंसकेऽपि प्रयोगदर्शनात्। तथा च बृहद्देवतायां प्रयुज्यते—"न प्रत्यक्षमनृषेरस्ति मन्त्रम्" [८।१२९]।

यजुःशाखासु मन्त्रैः सह ब्राह्मणमपि समाम्नायते, तासामेव सूत्रकारैर्मन्त्रब्राह्मणयोर्वेदनामधेयत्वमुच्यते। अत इदमवगम्यते—यद् यासु संहितासु मन्त्रा एव पठ्यन्ते, तासां वेदत्वं पुरा लोकप्रसिद्धमासीत्। अत एव तासां सूत्रकारैरेतादृक् किमपि वचनं न पठितम्। यासु च शाखासु ब्राह्मणान्यपि पठ्यन्ते, तासां तादृग्वेदप्रसिद्धेरभावात् स्वीयशाखानामपि वेदत्वप्रतिपादनाय स्वीयशास्त्रकार्यनिर्वाहायेदं सूत्रं पठितम्। सत्येवम्, मन्त्राणामेव वास्तविकी वेदसंज्ञा, न ब्राह्मणानामित्यपि स्पष्टं प्रतीयते।

चिरकालं यावत् प्राचीनैराचार्यैर्ब्राह्मणानां वेदसंज्ञा न स्वीकृता—कृष्णयजुर्वेदीय-श्रौतसूत्रकारैर्मन्त्रब्राह्मणयोर्वेदनामधेयविधाने कृतेऽपि चिरकालपर्यन्तं प्राचीनैरनेकैराचार्यैरिदं मतं नोररीकृतम्। एतदभिप्रेत्यैव **"मन्त्रब्राह्मणयोर्वेदनामधेयम्"** इत्यापस्तम्बीयसूत्रं व्याचक्षाणेन हरदत्तेनोक्तम्—**"कैश्चिन्मन्त्राणामेव वेदत्वमाख्यातम्"** इति। ततः पूर्ववर्तिना धूर्तस्वामिनाऽपि तत्रैव प्रतिपादितम्—**"कैश्चिन्मन्त्राणमेव वेदत्वमाश्रितम्"** इति। एतेनापीदमेवावगम्यते यन्मन्त्राणामेव वेदसंज्ञा प्राचीनाचार्याणां सम्मतासीन्न ब्राह्मणानामपीति।

परिभाषा-प्रकरणे पाठः—अपरं चेदमवधेयम्—येषु येषु श्रौतसूत्रेषु **'मन्त्रब्राह्मणयोर्वेदनामधेयम्'** इति सूत्रं पठ्यते, तेषु सर्वेष्वेव परिभाषाप्रकरण एव पठ्यते। इदं सर्वजनप्रसिद्धं यत्पारिभाषिक्यः संज्ञास्तदैव विधीयन्ते, यदा ता लोकप्रसिद्धा न भवन्ति, प्रस्थानान्तरेष्वन्यविषयिका वा भवन्ति। निदर्शनं चात्र—**"शि सर्वनामस्थानम्"** [अ० १।१।४२]; **"अदेङ् गुणः"** [अ० १।१।२] इत्यादि पाणिनीयसूत्रजातम्। पारिभाषिक्यश्च संज्ञास्तेषु तेष्वेव शास्त्रेष्वाश्रीयन्ते, न ततोऽन्यत्र इत्यपि सर्वलोकप्रसिद्धम्। तथा सति **"मन्त्रब्राह्मणयोर्वेदनामधेयम्"** इत्यपि संज्ञा तेषु तेष्वेव श्रौतसूत्रेषु स्वीयशास्त्रकार्यनिर्वाहाय पाणिनीयगुणादिसंज्ञावन्नियता, न सार्वत्रिका सर्वसम्मता चेति व्यक्तम्। अनेनापि मन्त्राणामेव सर्वसम्मता वेदसंज्ञा, न ब्राह्मणानामित्येवापतति।

ऋग्यजुःसाम्नां श्रौतसूत्रेषु वेदसंज्ञाया अविधाने कारणम्—ऋग्वेदशुक्ल-

यजुःसामसंहितासु मन्त्राणामेव पाठात् तद्ब्राह्मणानां च पृथक्त्वेन दर्शनात्, तत्र के मन्त्राः कानि च ब्राह्मणानि इति सन्देहावसर एव नास्ति। अत एवै-तेषां वेदानां सूत्रकारैर्मन्त्रब्राह्मणयोर्वेदसंज्ञाविधानाय न प्रयतितम्।

कृष्णयजुषः सर्वासु शाखासु मन्त्रब्राह्मणयोः सह पाठान्न ज्ञायते कोऽत्र मन्त्रः किं च ब्राह्मणमिति। अत एव तत्रभवद्भिर्याज्ञिकैरुभयोर्भेदपरिज्ञानाय **"अनुष्ठीयमानकर्मस्मारकत्वं मन्त्रत्वं[1], विनियोजकं च ब्राह्मणम्[2]"** इति लक्षणं विहितम्।

मन्त्रब्राह्मणयोरुक्तलक्षणयोरव्याप्त्यतिव्याप्तिदोषौ—याज्ञिकैरादृते पूर्व-निर्दशितमन्त्रब्राह्मणयोर्लक्षणे अव्याप्त्यतिव्याप्तिदोषदूषिते स्तः। तद्यथा—

अव्याप्तिदोषः—याज्ञिकशिरोमणिना मीमांसाभाष्यकारेण शबरस्वामिना माध्यन्दिनसंहितायाश्चतुर्विंशतितमेऽध्याये पठितस्य **वसन्ताय कपिञ्जलान् आलभते** वचनस्य विषये मन्त्रलक्षणाधिकरणे (मी० २।१।३२, अधि० ७) लिखितम्—

कथंलक्षणो मन्त्र इति? तच्चोदकेषु मन्त्राख्या। अभिधानस्य चोदके-ष्वेवञ्जातीयकेषु अभियुक्ता उपदिशन्ति—**'मन्त्रानधीमहे, मन्त्रानध्याप-यामः, मन्त्रा वर्तन्ते'** इति। **प्रायिकमिदं लक्षणम्। अनभिधायका अपि केचि-न्मन्त्रा इत्युच्यन्ते। यथा—वसन्ताय कपिञ्जलानालभत इति** (मा० सं० २४। २०)।

शबरस्वामिन इदं मतं स्वीकृत्याऽऽधुनिकैर्मीमांसकैः **'यान् अभियुक्ता मन्त्र इति ब्रूयुस्ते मन्त्रा'** इति सिद्धान्तं स्थिरीकृतम्। एतेन स्पष्टं यत्प्राचीनानाम् आधुनिकानां च समेषां मीमांसकानां मते न केवल **वसन्ताय कपिञ्जलानालभते**

---

१. तच्चोदकेषु मन्त्राख्या। मी० २।१।३२॥ अत्रैव सूत्रे—तथा चानुष्ठे-यार्थस्मारकवाक्यत्वं मन्त्रलक्षणमिति पर्यवस्यति। कुतूहलवृत्तिः।

२. तै० सं० भट्टभास्करभाष्य, भाग १, पृष्ठ ३ (मैसूर-संस्क०)।

इत्येव मन्त्रसंज्ञकः, अपि त्वेतादृशि चतुर्विंशतितमेऽध्यायेऽन्यत्र च द्रव्यदेवता-विधायकानि वाक्यानि मन्त्रा एव। याज्ञिकानाम् उक्तलक्षणानुसारं **वसन्ताय कपिञ्जलानालभते** इति वचनस्य तत्सदृशामन्येषां च वचनानां मन्त्रत्व न प्राप्नोति। यत एतानि न कस्यचित् यज्ञे क्रियमाणस्य कर्मणः स्मारकानि। अत उक्तं मन्त्रलक्षणमव्याप्तिदोषदुष्टम्।

अतिव्याप्तिदोषः—ब्राह्मणबोधकं **विनियोजकं ब्राह्मणम्** इति लक्षणानुसारं द्रव्यदेवताविधायकत्वान्मीमांसकैर्मन्त्ररूपेण स्वीकृते **'वसन्ताय कपिञ्जलानालभते'** इति वचने तत्सदृशेषु च ब्राह्मणत्वं प्राप्नोति। अत इदं ब्राह्मणलक्षणमतिव्याप्तिदोपदुष्टम्।

'मन्त्रब्राह्मणयोर्वेदनामधेयम्' इति सूत्रस्य मीमांसायाः **सारः**—अस्माभिः **मन्त्रब्राह्मणयोर्वेदनामधेयम्** इति सूत्रस्य विषये विविधदृशा यो विचारः कृतः, तदनुसारं ब्राह्मणानां वेदसंज्ञाया अभावे निम्नहेतवः—

१. मन्त्रात्मकानां शाकल-वाजसनेय-कौथुमादिसंहितानां तच्छ्रौतसूत्रकारैः **मन्त्रब्राह्मणयोर्वेदनामधेयम्** इत्येतादृक्सूत्रस्यानिर्देशात्।

२. मन्त्रब्राह्मणात्मकानां कृष्णयजुषाम् आपस्तम्बादिश्रौतसूत्रकारैरेव **मन्त्रब्राह्मणयोर्वेदनामधेयम्** इत्येतादृशः सूत्रस्य प्रणयनात्।

३. कृष्णयजुषां श्रौतसूत्रेष्वपि उक्तसूत्रस्य **परिभाषा-प्रकरणे** एव पाठात्।

४. **मन्त्रब्राह्मणयोर्वेदनामधेयम्** इत्यापस्तम्बसूत्रस्य व्याख्यातृभ्यां हरदत्त-धूर्तस्वामिभ्यां **कैश्चिन्मन्त्राणामेव वेदत्वमाख्यातम्, (प्रतिपादितम्)** निर्देशात् **प्रमाणभूतानामाचार्याणां मते मन्त्राणामेव मुख्यं वेदत्वम्, न ब्राह्मणानामिति सुनिश्चितं भवति।**

यत्तु कृष्णयजुषां श्रौतसूत्रकारैः परिभाषाप्रकरण एव ब्राह्मणानां वेदत्वमुक्तम्, तस्येदमेव प्रयोजनं यत्तेषां शास्त्रे यत्र क्वचिद् वेदशब्देन निर्देशस्तत्र मन्त्रैः सह ब्राह्मणानामपि ग्रहणं भवेत्। यथा पाणिनीये तन्त्रे **वृद्धिरादैच्**

(अष्टा० १।१।१) इत्यादिभिः सूत्रैर्या 'आ-ऐ-औ' इत्यादीनां वृद्धयादयः कृत्रिमाः संज्ञा उक्तास्तास्तस्मिन्नेव तन्त्रे 'आ-ऐ-औ' आदीनां ग्राहिकाः स्वीक्रियन्ते, न तन्त्रान्तरे। एवं कृष्णयजुषां श्रौतसूत्रकारैर्विहिता मन्त्रब्राह्मणयोर्वेदसंज्ञा तेष्वेव तन्त्रेषु व्यवतिष्ठते, न तन्त्रान्तरे वेदसंज्ञया ब्राह्मणानां ग्रहणं भवति। **मन्त्रब्राह्मणयोर्वेदनामधेयम्** इति परिभाषाप्रकरणस्थेन सूत्रेण कृष्णयजुषां श्रौतसूत्रादिषु या ब्राह्मणानां वेदसंज्ञा उक्ता, तां तच्छास्त्रे वयमपि स्वीकुर्मः। एतत्सूत्रविहितां पारिभाषिकीं ब्राह्मणग्रन्थानां वेदसंज्ञां यदा तन्त्रान्तरेष्वपि बलात् स्वीकर्तुमशास्त्रीयमाग्रहं प्रदर्शयन्ति, तत्र न वयं वेदसंज्ञया ब्राह्मणानां ग्रहणं स्वीकुर्मः।

अन्वय-व्यतिरेकाभ्यामपि ब्राह्मणानामवेदत्वम्—यदि श्रौतसूत्रप्रवचनकाले मन्त्रवद् ब्राह्मणानामपि वेदत्वं सर्वलोकप्रसिद्धमभविष्यत् तर्हि कृष्णयजुषां श्रौतसूत्रकारा अपि ऋग्यजुःसाम्नां श्रौतसूत्रकाराणामिव **'मन्त्रब्राह्मणयोर्वेदनामधेयम्'** एतादृक् सूत्रं नापठिष्यन्। सत्यपि वा मन्त्राणामिव ब्राह्मणानामपि वेदत्वे प्रसिद्धे कृष्यणजुःश्रौतसूत्रकाराणामिव ऋग्यजुःसाम्नां श्रौतसूत्रकारा अपि लोकप्रसिद्धेर्दार्ढ्याय ब्राह्मणानां वेदत्वं प्रत्यज्ञास्यन्, न च तथोपलभ्यते। तदेवमन्वयव्यतिरेकाभ्यामपि मन्त्राणामेव वेदत्वम्, न ब्राह्मणानां तच्छेषभूतानामारण्यकानां तदन्तःपतितानामुपनिषदां चेति विस्पष्टं प्रतीयते।

सत्येवम्, अयाज्ञिकग्रन्थेष्वपि यत्र क्वचिद् वेदशब्देन ब्राह्मणानां ग्रहणं दृश्यते, तत्त्वापस्तम्बादिसूत्रकारमतानुरोधात्, तन्मतस्यान्यैरपि ग्रन्थकारैराश्रयणात्, ब्राह्मणानां मन्त्रव्याख्यानरूपत्वाद् व्याख्याग्रन्थेषु व्याख्येयग्रन्थस्योपचाराद्वा कथंचित् समाधेयम् इत्येव सुगमः पन्थाः।

तदेवं **मन्त्रब्राह्मणयोर्वेदनामधेयम्** इति सूत्रेण मन्त्राणामेव वास्तविकी वेदसंज्ञा, न ब्राह्मणानामित्यस्माभिर्निपुणतरमुपपादितम्।

वेद-संज्ञाया अन्यल्लक्षणम्

कैश्चिद् विद्वद्भिर्मन्त्रब्राह्मणयोर्वेदत्वप्रतिपादनायैकमपरं लक्षणम् उप-

स्थाप्यते । तथाहि—

सम्प्रदायाविच्छिन्नत्वे सत्यस्मर्यमाणकर्तृकत्वं वेदत्वम्[१] ।

इदमपि वेदसंज्ञालक्षणं न ब्राह्मणग्रन्थानां वेदत्वप्रतिपादनायालम् । कुत इति चेत् ? लक्षणस्याव्याप्त्यतिव्याप्तिदोषदुष्टत्वात् । तथाहि—

अतिव्याप्तिदोषः—ये हि विद्वांसो मन्त्रब्राह्मणयोर्वेदत्वं प्रतिजानते तेषां मतेऽनेन लक्षणेन केषाञ्चित् पौरुषेयग्रन्थानामपि वेदत्वमापद्यते । तथाहि—

सन्ति केचनैतादृशाः पौरुषेया ग्रन्था येषाम् अध्ययनसम्प्रदायस्याविच्छेदेऽपि कर्तुरस्मरणं दृश्यते, यथा माध्यन्दिनसंहितायाः काण्वसंहितायाश्च पदपाठः । एतादृशामपि वेदत्वमनेन लक्षणेन प्राप्यते । पदपाठाश्च पौरुषेया इत्यत्र न कस्यचिदपि सुधियो वैमत्यम्, तथापि तेषां पौरुषेयत्वे त्रीणि प्रमाणान्युदाह्रियन्ते—

१—**'वा' इति 'य' च इति च चकार शाकल्यः । उदात्तं त्वेवमाख्यातमभविष्यद् असुसमाप्तश्चार्थः** इति निरुक्ते (६।२८) यास्काचार्यः ।

---

१. १९६४ तमस्य क्रैस्ताब्दस्य नवम्बरमासस्य १२ तारिकात आरभ्य १८ तारिकापर्यन्तम् 'अमृतसर' नगरे श्रीकरपात्रस्वामिनः (श्रीकरपात्रिस्वामिनः) तत्त्वावधाने पुरीनगरस्थशङ्करपीठाचार्यस्य श्रीनिरञ्जनदेवस्वामिनः सभापतित्वे **सर्ववेदशाखा सम्मेलनम्** अभूत् । तस्मिन् १६-१७-१८ तारिकासु **'वेदे विज्ञानमस्ति न वा' 'ब्राह्मणग्रन्थानां वेदसंज्ञा विद्यते न वा'** इत्यनयोर्विषययोर्मम सनातनधर्मावलम्बिभिर्विद्वद्भिर्महात्मभिश्च सह शास्त्रार्थोऽभूत् । तत्र मदीयः पक्ष आसीत् वेदे **प्राधान्येन विज्ञानस्यैव प्रतिपादनमस्ति,** तथा **'ब्राह्मणग्रन्थानां मन्त्राणामिव सामान्या वेदसंज्ञा नास्ति'** । तत्र **मन्त्रब्राह्मणयोर्वेदनामधेयम्** सूत्रविषयकानामाक्षेपाणां यदा न किमप्युत्तरं प्रत्यभिज्ञायि तदा वेदसंज्ञाविषयकमिदं 'सम्प्रदायाविच्छिन्नत्वे सत्यस्मर्यमाणकर्तृकं वेदत्वमिति' लक्षणं प्रस्तुतम् ।

२—**न लक्षणेन पदकारा अनुवर्त्याः, पदकारैर्नाम लक्षणमनुवर्त्यम् यथा-लक्षणं पदं कर्तव्यम्** इति महाभाष्ये त्रिभंगवान् पतञ्जलिराह (३।१।१०९; ६।१।२०७; ८।२।१६)।

३—**न लक्षनणेनेति—संहिताया एव नित्यत्वम्, पदच्छेदस्य तु पौरुषेयत्वम्** इति भाष्यव्याख्याने (प्रदीपे ३।१।१०९) कैयटः।

उक्तैः प्रमाणैः पदपाठस्य पौरुषेयत्वं सुव्यक्तम्। माध्यन्दिनपदसंहितायाः काण्वपदसंहितायाश्च अध्ययनसम्प्रदायस्याविच्छेदे न केवलं वैदिका एव प्रमाणम्, अपि तु तयोर्ग्रन्थयोः क्वचिदपि पाठभेदस्यानुपलम्भनमपि सुदृढं प्रमाणम्। एवं च सति उक्तलक्षणेन माध्यन्दिनपदग्रन्थस्य काण्वपदग्रन्थस्य चापि वेदत्वं प्राप्नोति, न तद् वैदिकानामिष्टम्।

अव्याप्तिदोषः—ब्राह्मणग्रन्थानां वेदत्वं स्वीकुर्वतां सम्प्रति स्वररहितानां शाखानां ब्राह्मणानां च वेदत्वं न सिद्धयति[1]। कथमिति चेत्? प्राचीने काले यदेयं सुरभारती लोकव्यवहारे प्रयुक्ताऽऽसीत् तदानीमस्याम् उदात्तादिस्वराणां सद्भाव आसीदिति पाणिनीये शास्त्रे भाषायामपि स्वरविधायकानां सूत्राणां दर्शनाद् विज्ञायते। यदा खलु वैदिकवागिव लौकिकभाषाऽपि सस्वराऽऽसीत् तदा सर्व एव वैदिका ग्रन्थाः, विशेषतः शाखाब्राह्मणारण्यकग्रन्थाः सस्वरा एवासन् इत्यत्र न कश्चिच्छङ्कावरः। सम्प्रति कांश्चिच्छाखाब्राह्मणारण्यक-ग्रन्थान् विहाय सर्वेऽप्युपलभ्यमानाः शाखाब्राह्मणारण्यकग्रन्था विस्वरा एवोपलभ्यन्ते। एषां स्वरराहित्यं च न सम्प्रदायविच्छेदमन्तरा संभवति। तदेवं सम्प्रत्युपलभ्यमानेषु स्वरविरहितेषु शाखाब्राह्मणारण्यकग्रन्थेषु **'सम्प्रदायाविच्छिन्नत्वे सति'** इत्यंशस्याभावान्न वेदत्वं प्राप्नोति[2]।

---

१. शाखानां यथा—जैमिनीयकठकपिष्ठलादीनाम्, ब्राह्मणानाम्—ऐतरेय-शाङ्खायनादीनाम्, आरण्यकानाम्—ऐतरेयशाङ्खायनादीनाम्।

२. यदा स्वरविरहितानां शाखाब्राह्मणारण्यकादीनां सम्प्रदायविच्छेदाद्

अपि च वेदत्वेनाभिमतेषु ग्रन्थेषु स्वरसद्भावोऽत्यन्तमावश्यकः, तदन्तरा त्वेषां वेदत्वमेव न प्राप्नोति। एतच्च कल्पसूत्राणां वेदवत्प्रामाण्यनिराकरणाय **नासन्नियमात्** (१।३।१२) इति हेतुरुपस्थापयता भगवता जैमिनिना व्यक्तीकृतम। शबरस्वामिना च **असन्नियमात् नैतत् सम्यङ् निबन्धनम्, स्वराभावात्** इत्येवं व्याख्यायता स्वरराहित्यादेव कल्पसूत्राणां वेदवत् प्रामाण्यं निराकृतम्।

यदि हि प्रवचनकालादेव ऐतरेयादिब्राह्मणग्रन्थाः स्वरविरहिता अभविष्यंस्तर्हि जैमिनिः कल्पसूत्राणां वेदत्वप्रामाण्यनिराकरणाय **नासन्नियमात्** इति हेतुं नोपास्थापयिष्यत्, न च शबरस्वामी तथाव्याख्यास्यत्। एवं च भगवतो जैमिनेः काले सर्वेऽपि ब्राह्मणारण्यकग्रन्थाः सस्वरा एवासन्, तेषु च स्वरनाश उत्तरकाल एवाभूद् इति विस्पष्ट भवति। अयं च स्वरविनाशः सम्प्रदायविच्छेद एव सम्भवति, नान्यथा। सम्प्रदायविच्छेदे सति ऐतरयादिब्राह्मणानां वेदत्वमुक्तेन लक्षणेन न प्राप्नोति।

इत्थमुक्तलक्षणमप्यव्याप्त्यतिव्याप्तिदोषात् न ब्राह्मगग्रन्थानां वेदत्वबोधनाय समर्थमिति विस्तरेणास्माभिर्व्यक्तीकृतम्।

ब्राह्मणग्रन्थानां वेदसंज्ञाभावनिदर्शकमेकं ब्राह्मणवचनम्

गोपथब्राह्मणे (पू० २।१०) श्रूयते— **एवमिमे सर्वे वेदा निर्मिताः सकल्पाः सरहस्याः सब्राह्मणाः सोपनिषत्काः सेतिहासाः सपुराणाः**……।

अस्मिन् वचने इतिहासपुराणादिवद् ब्राह्मणोपनिषदा वेदात् पृथग्ग्रहणं दृश्यते। यद्यत्र ब्राह्मणवसिष्ठन्यायेन ब्राह्मणोपनिषदां वेदत्वे सत्यपि पृथग्ग्रहणमिष्येत, तर्हीतिहासपुराणादीनामपि वेदसंज्ञा गले पतति। इतिहासपुराणादीनां वेदसंज्ञा तु न ब्राह्मणग्रन्थानां वेदसंज्ञां स्वीकुर्वतां मतेऽपीष्यते। ब्राह्मणवसिष्ठन्यायोऽप्यत्र तदैवोपस्थापयितुं शक्यते, यदि केनचिद् ब्राह्मणवचनेन ब्राह्मणानामपि वेदसंज्ञा विहिता स्यात्।

वेदत्वं न सम्भवति, तर्हि सम्प्रदायविच्छेदात् सर्वथा लुप्तानां शाखानां ब्राह्मणारण्यकानां च वेदत्वे तु का कथा ?

अपि च **सकल्पाः सरहस्याः सब्राह्मणाः** इत्यत्र **तेन सहेति तुल्ययोगे** (अ० २।२।२८) सूत्रेण समासो भवति—**सह ब्राह्मणेन सब्राह्मणा वेदाः**। 'ब्राह्मणेन इत्यत्र या सहयोगे तृतीया सा **सहयुक्तेऽप्रधाने** (अ० २।३।१९) इति नियमेन अप्रधाने भवति। तेन यथा 'सह पुत्रेण पिता आगतः=सपुत्रः पिता आगतः' इत्यत्र पितुर्मुख्यत्वं पुत्रस्य च गौणत्वं द्योत्यते, तथैव **सकल्पाः सरहस्याः सब्राह्मणाः** इत्यादिपदैः कल्परहस्यब्राह्मणग्रन्थानां च वेदानामपेक्षया गौणत्वमेव प्रतीयते। यत्तु समासविधायके सूत्रे तुल्यप्रयोगपदं तत्तु क्रियापदापेक्षया, नतु पित्रादिपदानामपेक्षया। तेन **इमे वेदा निर्मिताः** इत्यत्र श्रूयमाणायां निर्मिति-क्रियायां सहभावमात्रं शक्यते वक्तुम्, न तु कल्परहस्यब्राह्मणादीनां वेदवत् प्राधान्यम्। अपि च तुल्ययोगग्रहणं प्रायिकमाहुर्वैयाकरणाः सकर्मकादिषु तथा-दर्शनात् (द्र०—काशिका २।३।१८)।

यद्युक्तब्राह्मणवाक्ये निर्मितिक्रियायां सहभावज्ञापनेन कश्चिद् ब्राह्मणा-दीनामप्यपौरुषेयत्वमातिष्ठेत, तर्हि सोऽनुयोक्तव्यः—तव मते कल्पेतिहास-पुराणादीनाम् अपौरुषेयत्वं पौरुषेयत्वं वा? यदि पौरुषेयत्वं तर्हि कल्पेतिहास-पुराणादीनां पौरुषेयाणां ग्रन्थानां यथा निर्मितिक्रियायां वेदेन तुल्ययोगत्वं भवान् प्रतिपादयिष्यति, तथा वयमपि ब्राह्मणोपनिषदां पौरुषेयत्वेऽपि सहभावं वक्तुं प्रभविष्यामः। यदि कल्पेतिहासादीनां लोकप्रसिद्धानां ग्रन्थानामपौरुषेयत्वमिष्यते, तर्हि सकललोकविज्ञानविरोधादप्रामाण्यं भवद्वचनस्य स्यात्।

अस्मन्मते तु न कश्चिद् दोषः। भगवता शङ्कराचार्येण—**एवं वाऽरेऽस्य महतो भूतस्य निःश्वसितमेतद् यदृग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरस इतिहासः पुराणम्** (बृ० उप० २।४।१०) इत्यादिबृहदारण्यकश्रुतिव्याख्याने यथेतिहास-पुराणवाकोवाक्यव्याख्यानानुव्याख्यानादिपदानां विवरणे ब्राह्मणान्तर्गतान् वा इतिहासपुराणादीन् आश्रित्य ब्राह्मणग्रन्थस्थान्येव वचनान्युपन्यस्तानि। तथैवास्मन्मतेऽस्मिन् गोपथब्राह्मणे वेदेन सह रहस्यब्राह्मणेतिहासपुराणादीनामु-त्पत्तिवचनाद् इमानि पदानि **संहितागततथाविधविशिष्टमन्त्राणामेव वाचकानि**

सन्ति। तथाहि—ब्राह्मणरूपाः—'वसन्ताय कपिञ्जलान् आलभते' (शुक्ल यजुः २४।२०) इत्येवमादयो मन्त्राः; इतिहासरूपाः—'हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत्' (ऋ० १०।१२१।१) इत्येवमादयो मन्त्राः; पुराणरूपाः—'नासदासीन्नो सदासीत्तदानीम्'(ऋ० १०।१२९।१) इत्येवमादयो मन्त्राः। एवम् अन्येऽपि तत्तद्विषयका मन्त्रा एवेह ग्रहीतुं शक्याः। इत्यलमतिविस्तरेण।

एवं च मन्त्राणामेव मुख्यं वेदत्वं न ब्राह्मणानामिति निपुणतरमस्माभिरस्मिन् निबन्धे उपपादितम्। आशासे वैदिका विद्वांसो मत्सरं विहाय युक्तिप्रमाणजुष्टमिदं मतं स्वीकरिष्यन्तीत्यलं बुद्धिमद्वर्येषु॥

श्रुति-संज्ञा-विचारः

सम्प्रति श्रुतिशब्दविषये विचार्यते। श्रुतिशब्दोऽपि वेदशब्दवद् अनेकार्थो विवादास्पदश्च वर्तते। वेदसंज्ञया त्वस्त्यत्र किञ्चिद् वैषम्यम्। यथा ब्राह्मणानां वेदसंज्ञा पारिभाषिक्युच्यते, न तथा श्रुतिसंज्ञाविषयेऽस्ति काचित् परिभाषा।

श्रुतिशब्दस्यानेकार्थता—श्रुतिशब्दः 'श्रु श्रवणे'धातोर्भावे कर्मणि करणे च कारके स्त्रियां क्तिन् (अष्टा० ३।३।९४) इत्यनेन क्तिन्प्रत्यये निष्पद्यते। तदनुसारम्—श्रवणं श्रुतिः, श्रूयत इति श्रुतिः, श्रूयतेऽनयेति वा श्रुतिः। वैदिकवाङ्मये श्रुतिशब्दः सामान्येन मन्त्रार्थं ब्राह्मणार्थं च व्यवह्रियते। मनुस्मृतौ श्रुतिशब्दस्य निम्नप्रयोगा द्रष्टव्याः—

१—श्रुतिद्वैधं तु यत्र स्यात् तत्र धर्मावुभौ स्मृतौ।
उदितेऽनुदिते चैव समयाध्युषिते तथा।
सर्वथा वर्तते यज्ञ इतीयं वैदिकी श्रुतिः॥ २।१५॥

२—श्रुतिस्तु वेदो विज्ञेयो धर्मशास्त्रं तु वै स्मृतिः॥ २।१०॥

३—श्रुतीरथर्वाङ्गिरसीः कुर्यादित्यविचारयन्॥११।३३॥

४—धर्मं जिज्ञासमानानां प्रमाणं परमं श्रुतिः ॥२।१३॥

५—विविधाश्चौपनिषदीरात्मसंसिद्धये श्रुतीः ॥६।२९॥

मनुस्मृतेरेतेषूद्धरणेषु श्रुतिशब्दः निस्संदेहं मन्त्रार्थं ब्राह्मणार्थं च प्रयुक्तः। पञ्चमे प्रमाणे औपनिषदीनां श्रुतीनां निर्देशो विद्यते। उपनिषदोऽपि ब्राह्मणेष्वेव परिगण्यन्ते। तृतीये प्रमाणे अथर्वाङ्गिरसी श्रुतिर्निसन्देहं अथर्वणा संबद्धा स्यात् तद्ब्राह्मणेन वा।

पूर्वमीमांसायाः श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यम् अर्थविप्रकर्षात् (३।३।१४) इति सूत्रे श्रुतेरुदाहरणं सर्वे मीमांसकाः ऐन्द्रया गार्हपत्यमुपतिष्ठते (मै० सं० ३।२।४) इत्युपस्थापयन्ति। अत्र च गार्हपत्यम् इति श्रवणं श्रुतिरिति स्वीकुर्वन्ति। मीमांसकमतानुसारं 'श्रुति'शब्दस्यार्थः साक्षात् शब्दश्रवणे सत्यपि श्रुतिशब्दस्यार्थः श्रूयते सम्बन्धो यया अर्थात् यया सम्बन्धविशेषस्य परिज्ञानं भवेत् तद् ब्राह्मणवाक्यं श्रुतिरित्युच्यते। स च सम्बन्धो द्रव्यदेवतयोः स्यात् मन्त्रकर्मणोर्वा। एवं च श्रुतिशब्दो विनियोगस्य पर्यायो भवति।

शाखा-ब्राह्मण-सूत्ररूपे कर्मकाण्डीयवाङ्मये विनियोजको यः पदसमुदायः, स चेन्मन्त्ररूपो वा स्याद् ब्राह्मणरूपो वा, सर्वोऽपि श्रुतिरित्युच्यते। अस्मिन्नर्थे कतिपयानि तथाभूतानि प्रमाणान्युपस्थापयामो येषु श्रुतिशब्दस्यायमर्थः सुस्पष्ट गृह्यते। यथा—

१. माध्यन्दिनसंहिताया भाष्यकार उव्वटः चतुर्विंशत्यध्यायस्यारम्भे लिखति—

इत उत्तरं श्रुतिरूपा मन्त्राः प्राश्वमेधिकानां पशूनां द्रव्यदेवतासंबन्धस्याभिधायिनः।

२. शुक्लयजुर्वेदस्यासाधारणो विद्वान् महायाज्ञिको 'वारे', इत्युपह्वायः

श्रीधरशास्त्री ऋग्यजुःपरिशिष्टस्य[1] **'देव सवितरिति तिस्रः प्राक्प्रैषेभ्यो ब्राह्मणपाठेभ्यः'** (पृष्ठ ८८) इति वचनस्य व्याख्यायां लिलेख—**प्राक्प्रैषेभ्यो निगदेभ्यो ब्राह्मणपाठेभ्यः श्रुतिरूपेभ्यो यजुषः प्राक्** इति ।

उक्ताभ्यामुद्धरणाभ्यामिदं विस्पष्टं भवति यद् ब्राह्मणस्य **विनियोजकं ब्राह्मणम्**[2] इति लक्षणं येषु मन्त्रेषु संघटते, ते मन्त्रा अपि ब्राह्मणशब्देन श्रुतिशब्देन चाभिधीयन्ते । एवं च याज्ञिकग्रन्थेषु ब्राह्मणानां वेदसंज्ञा इव न श्रुतिसंज्ञा पारिभाषिकी, तथापि याज्ञिकानां मते विनियोजकवाक्यस्य श्रुतिसंज्ञा स्वसम्प्रदायसिद्धा विज्ञेया ।

सम्प्रति मीमांसाशास्त्रे प्रयुक्तस्यातिमहत्त्वपूर्णस्य **'आम्नाय'**शब्दस्य विषये विचार्यते—

आम्नाय-संज्ञा-विचारः

'आम्नाय' इत्येषा सामान्या संज्ञा । अस्याः प्रयोगो मन्त्र-ब्राह्मण-आरण्यक-उपनिषद्भ्यः, तथा आयुर्वेद-धर्मशास्त्र-नाटयशास्त्राद्यनेकविषयकाणां मूलभूतेभ्यः शास्त्रेभ्यो दृश्यते । सम्पूर्वकस्याऽम्नायशब्दस्य अर्थात् समाम्नायशब्दस्य प्रयोगो विविधविषयकाणां ग्रन्थानां मूलभूतभागायोपलभ्यते । यथा— **समाम्नायः समाम्नातः, स व्याख्यातव्यः** इति निघण्टुरूपाय निरुक्ताय[3], पाणिनीये तन्त्रे अक्षर-

---

१. अस्मिन् परिशिष्टे शुक्लयजुषि के मन्त्रा ऋचो यजूंषि वा सन्तीति विभज्य प्रतिपाद्यते । इदं परिशिष्टं नासिकतः प्रकाशिते 'दशपरिशिष्ट' इति संग्रहे उपलभ्यते ।

२. तै० सं० भट्टभास्कर भाष्य, भाग १, पृष्ठ ३, मैसूरसंस्क० ।

३. सम्प्रति यो यास्कीयो ग्रन्थो निरुक्तनाम्ना व्यवह्रियते, स तु व्याख्यारूपः । अत एव सम्प्रति निरुक्तशब्देन व्यवह्रियमाणस्य प्रथमाध्यायस्य दुर्गवृत्तौ स्कन्दस्वामिटीकायां च **निरुक्तभाष्ये षष्ठोऽध्यायः** इति प्रयोग उपलभ्यते । स च निघण्टुसंज्ञकस्य भागस्यैव निरुक्तनाम्नि सत्येवोपपद्यते ।

समाम्नाय इति प्रत्याहारसूत्रेभ्यः । सम्प्रति 'आम्नाय'शब्दस्य विविधार्थेषु कतिपये प्रयोगा निदर्श्यन्ते—

१. मन्त्र-ब्राह्मणाभ्याम्—यथा कृष्णयजुषः श्रौतसूत्रकारैर्ब्राह्मणानां वेद-संज्ञायै मन्त्रब्राह्मणयोर्वेदनामधेयम् इति परिभाषा-सूत्रं सूत्रितम्, तथैव कौशिक-सूत्रकारेण मन्त्रब्राह्मणयोराम्नायसंज्ञायै आम्नायः पुनर्मन्त्रा ब्राह्मणानि च (१।३) इति सूत्रं पठितम् ।

२. आयुर्वेदस्य मूलागमाय—आयुर्वेदस्य चरकसंहितायाः सूत्रस्थाने पृच्छा-तन्त्राद् यथाम्नायविधिना प्रश्न उच्यते (अ० ३०, खं० ६७) इत्यत्र आम्नाय-पदस्य प्रयोग आयुर्वेदस्य मूलभूतायागमाय क्रियते ।

३. धर्मशास्त्रस्य मूलागमाय—गौतमधर्मसूत्रे श्रूयते—

यत्र चाम्नायो विदध्यात् । १।५१।।

आम्नायैरविरुद्धाः । १०।२२।।

उभयत्र धर्मशास्त्रमूलभूतागमाय 'मानवधर्मशास्त्राय' आम्नायपदस्य व्यवहार उपलभ्यते ।

४. नाट्यशास्त्रस्य मूलागमाय—पाणिनेः छन्दोगौक्थिकयाज्ञिकबह्वृच-नटाञ्ञ्यः (४।३।१२९) इति सूत्रे धर्माम्नायशब्दयोः सम्बन्धः सर्वसम्मतः । अतोऽत्र नटशब्दात् ञ्यः प्रत्ययो धर्माम्नाययोरेव भवति (द्र०—काशिका ४।३।१२९) । तेन नटानां धर्म आम्नायो वा नाट्यम् इत्युच्यते । अत्र आम्नाय-शब्देन नाट्यवेदोऽर्थाद् भरतनाट्यशास्त्रमुच्यते ।

मीमांसायामाम्नायशब्दस्य प्रयोगः—यद्यपि भगवतः जैमिनिना स्वीये मीमांसाशास्त्रे 'आम्नाय'पदस्य बहुत्र प्रयोगः कृतः, तथाप्यस्य शब्दस्य नहि तादृशस्य विशिष्टार्थस्य क्वचित् संकेतः कृतो येनास्य विस्पष्टोऽभिप्रायो विज्ञायेत ।

शबरस्वामिनो मतानुसारं मीमांसाशास्त्रस्य प्रथमाध्यायस्यान्तिममधिकरणं **वेदापौरुषेयत्वाधिकरणं** विद्यते । एतस्य प्रथमसूत्रे **वेदांश्चैके सन्निकर्षं पुरुषाख्याः** (१।१।२७) इति सूत्रे 'वेद'शब्दस्य प्रयोग उपलभ्यते । ततोऽव्यवहितोत्तरं द्वितीयपादस्य प्रथमम् **'अर्थवादप्रामाण्याधिकरणम्'** अस्ति । तस्य प्रथमे **आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्** (मी० १।२।१)इति सूत्रे **आम्नाय**-शब्दस्य प्रयोग उपलभ्यते । अस्मिन् सूत्रे आम्नायस्य क्रियार्थोपदेशात्, तस्य योंऽशो न क्रियार्थस्तस्यानर्थक्यदोषोपस्थापनाद् विस्पष्टमिदं यदत्र सूत्रे आम्नाय-पदेन मन्त्रब्राह्मणयोरुभयोर्ग्रहणमभिप्रेतं सूत्रकारस्य ।

अपि च, वेदापौरुषेयत्वाधिकरणे **अनित्यदर्शनाच्च** (मी० १।१।२८)सूत्रेऽनित्यत्वदर्शनं नाम यो हेतुरुक्तः, स एव उत्तरत्र अर्थवादप्रामाण्याधिकरणेऽपि **अनित्यसंयोगात्** (मी० १।२।६) इति हेतुरुपस्थापितः । अनया पुनरुक्त्या विस्पष्टमिदं भवति यत् पूर्वत्र **यस्मिन् वेदे अनित्यत्वदर्शनं नाम हेतुरुक्तः**, तस्मादयम् आम्नायोऽन्यो वर्तते । अत एवाऽऽम्नायस्यानित्यतायाम् = अप्रमाण-तायां हेतोर्वचनमुपपद्यते ।

वेदापौरुषेयत्वाधिकरणस्य आर्षमतानुसारं या व्याख्या अभिप्रेता, तस्या निदर्शनमस्माभिः तृतीयाध्यायान्ते प्रथमपरिशिष्टे षष्ठपृष्ठादारभ्य सप्तत्रिंशत् पृष्ठं यावद् विस्तरतरकेण विहितम् । शबरस्वामिना **कृते वा विनियोगः स्यात् कर्मणः सम्बन्धात्** (मी० १।१।३२) इति सूत्रं वेदापौरुषेयत्वाधिकरण एव व्याख्यातम् । अस्माभिस्तु **ब्राह्मणप्रामाण्याधिकरण**रूपेण व्याख्यातम् (द्र०—परिशिष्ट, पृष्ठ ३७-४२) ।

उपसंहारः

अस्मिन् निबन्धे प्राधान्येन कृष्णयजुषां श्रौतसूत्रकारैः पठितस्य **मन्त्र-ब्राह्मणयोर्वेदनामधेयम्** इति सूत्रस्य सम्बन्ध एव विचारितम् । अस्मिन् प्रकरणेऽस्माभिरयं प्रश्न उपस्थापितः—मन्त्रब्राह्मणयोर्वेदसंज्ञाविधायकं सूत्रं कृष्ण-

यजुषां श्रौतसूत्रेष्वेव कुत उपलभ्यते, ऋग्वेद-शुक्लयजुर्वेद-सामवेद-अथर्ववेदानां श्रौतसूत्रेषु कुतो न दृश्यते ? अस्य प्रश्नस्य सोपपत्तिकं सप्रमाणं चोत्तरमद्य-यावन्न केनापि विदुषा प्रत्तम् । श्रीकरपात्रस्वामिना (श्रीकरपात्रिस्वामिना) **वेदार्थपारिजात** नामके महत्तमे ग्रन्थेऽस्य निबन्धस्य खण्डने बहूनि पृष्ठानि कृष्णीकृतानि, परन्तु उक्तप्रश्नस्य न किमपि विद्वज्जनोचितं युक्तिप्रमाणयुतमुत्तरं प्रादायि ।

वस्तुत उक्तश्रौतवचनस्य प्रमाणेन ब्राह्मणग्रन्थानां वेदसंज्ञां स्वीकुर्वतां सविध उक्तप्रश्नस्योत्तरं नास्त्येव । यदि कश्चित् कञ्चित् पाणिनीयं वैयाकरणं पृच्छेत्—पाणिनिना **वृद्धिरादैच्** (१।१।१) इति सूत्रेण 'आ-ऐ-औ' वर्णानां वृद्धिसंज्ञा, **अदेङ्गुणः** (१।१।२) इति सूत्रेण 'अ-ए-ओ' वर्णानां गुणसंज्ञा कुतो विहिता ? तर्हि स पाणिनीयो वक्ष्यति—पाणिनिना स्वीयशब्दान्वाख्यान-प्रक्रियायाः सारल्याय शास्त्रस्य संक्षेपाय च लोके अविज्ञाते वृद्धिगुणरूपे कृत्रिमे संज्ञे विहिते । अनयोर्वृद्धिगुणसंज्ञयोर्यः संज्ञासंज्ञिसम्बन्धः स केवल पाणिनीये व्याकरण एव प्रवर्तते, न व्याकरणान्तरे; अन्यविषयकाणां शास्त्रान्तराणां तु कथैव नोदेति । इत्थमेव कृष्णयजुषां श्रौतसूत्रकारैर्विहिता मन्त्रब्राह्मणयोर्वेद-संज्ञाऽपि तत्तच्छास्त्रेषु प्रवृत्तिविशेषायैव विज्ञेया । अत उक्तसूत्रविहिताया वेद-संज्ञायाः प्रवृत्तिः तत्तच्छ्रौतसूत्रेष्वेव ज्ञेया, नान्यश्रौतसूत्रेषु, अन्यविषयकेषु ग्रन्थेषु त्वेतस्या वेदसंज्ञायाः प्रवृत्तेः प्रश्न एव नोदेति ।

अपि च, मन्त्रब्राह्मणयोर्वेदसंज्ञाविधायकसूत्रविषये यः प्रश्न उद्भावितः तस्योत्तरं त्वस्मन्मतेऽतितरां विस्पष्टम्—ऋग्वेद-यजुर्वेद-सामवेद-अथर्ववेदेषु मन्त्रसंहिता ब्राह्मणानि च पृथक्-पृथक् निबद्धानि सन्ति । अतस्तत्तच्छ्रौतसूत्र-कारैस्तथाविधसंज्ञाया विधानस्यावश्यकतैव नानुभूता । तेषां मन्त्रसंहिता वेद-रूपेण लोके प्रसिद्धा आसन् । कृष्णयजुषस्तु यावत्यः शाखा इदानीमुपलभ्यन्ते, तासु सर्वासु मन्त्रब्राह्मणयोः संमिश्रणं वर्तते । अतस्तत्र लोकप्रसिद्धाया वेदसंज्ञायाः प्राप्त्यभावाद् **मन्त्रब्राह्मणयोर्वेदनामधेयम्** इति सूत्रेण पारिभाषिकी वेदसंज्ञा

विहिता। पारिभाषिक्यः संज्ञास्तु स्व-तन्त्र एव प्रवर्तन्ते, न परतन्त्रे। यथा पाणिनीया वृद्धिगुणाद्याः कृत्रिमाः पारिभाषिक्यः संज्ञाः।

इत्थमेव श्रुतिसंज्ञा आम्नायसंज्ञा चापि पारिभाषिक्येव।

ये खलु वैदिका मन्त्रब्राह्मणयोर्वेदसंज्ञां सर्वतन्त्रगामिनीं सामान्यां मन्वते, ते यावदस्मिन् निबन्धे उपस्थापितानां निष्कर्षाणां सप्रमाणं सोपपत्तिकं च निराकरणं न कुर्वन्ति, तावत् स्वपाण्डित्यप्रदर्शनाय अथवाऽज्ञानमूलकान्ध-विश्वासस्य रक्षणाय यत् किमपि नाम लिखन्तु, न विदुषां कृते तत् प्रमाणार्हं भवितुमर्हति। इत्यलमतिविस्तरेण।

वेद-श्रुति-आम्नाय-संज्ञा-मीमांसा

प्रस्तुत निबन्ध में हम **वेद श्रुति** और **आम्नाय** संज्ञा पर विचार करेंगे। **मीमांसाशास्त्र** में **वेद श्रुति** और **आम्नाय** पदों का बहुधा प्रयोग मिलता है। इन संज्ञाओं के सम्बन्ध में वैदिकों में अनेक मत प्रचलित हैं। इसलिये इनके विषय में यह विचार करना आवश्यक है कि इन संज्ञाओं का मुख्यार्थ क्या है? पहले हम 'वेद' संज्ञा पर विचार करते हैं।

वेद-संज्ञा-मीमांसा

वेद शब्द के विविध अर्थों पर विचार करने से पूर्व इस शब्द के स्वरूप पर विचार करना आवश्यक है।

द्विविध वेद शब्द—वेद शब्द वैदिक-वाङ्मय में दो प्रकार का उपलब्ध होता है। एक—**आद्युदात्त** और दूसरा—**अन्तोदात्त**। आद्युदात्त वेद शब्द ज्ञान का पर्याय है, और अन्तोदात्त कुशाओं की मुष्टि से निर्मित यज्ञीय पदार्थ-विशेष का वाचक है। ऐसा वेदार्थ के जाननेवाले आचार्य कहते हैं।

आद्युदात्त वेदशब्द का निर्वचन हमें वैदिक-वाङ्मय में नहीं मिला। अन्तोदात्त का निर्वचन वैदिक-वाङ्मय में इस प्रकार उपलब्ध होता है—

वेदेन वै देवा असुराणां वित्तं वेद्यमविन्दन्त तद्वेदस्य वेदत्वम्। तै० सं० १।७।४।६॥

तां (वेदिं) वेदेनान्वविन्दन्। तै० ब्रा० ३।३।६।६॥

तं (यज्ञं) वेदेनाविन्दंस्तद्वेदस्य वेदत्वम्। मै० सं० १।४।८॥

तां (वेदिं) वेदेनाविन्दंस्तद्वेदस्य वेदत्वम्। मै० सं० ४।१।१३॥

तां (वेदिं) वेदेनान्वविन्दंस्तद्वेदस्य वेदत्वम्। का० सं० ३१।१२।।

तं (यज्ञं) वेदेनान्वविन्दंस्तद्वेदस्य वेदत्वम्। का० सं० ३२।६।।

तां (वेदिं) वेदेनान्वविन्दंस्तद्वेदस्य वेदत्वम्। कपि० ४७।११।।

इन सभी उद्धरणों में दर्भमुष्टि से निर्मित यज्ञीय उपकरण के वाचक वेद शब्द का निर्वचन है, यह इन प्रकरणों के अनुशीलन से सर्वथा विस्पष्ट है। शुक्लयजुः की संहिताओं में भी वेदोऽसि (माध्य० २।२१; काण्व १।७।७५) मन्त्र में दो बार पठित अन्तोदात्त वेदशब्द भी याज्ञिक-प्रक्रिया में वेदसंज्ञक यज्ञीयोपकरण का ही वाचक है, यह कात्यायन-श्रौत (३।८।२) के पत्नी वेदं प्रमुञ्चति—वेदोऽसीति वचन द्वारा वेद-प्रमुञ्चन में उक्त मन्त्र के विनियोग दर्शाने से स्पष्ट है।

वेद शब्द की द्व्यर्थता और द्विस्वरता को ध्यान में रखकर भगवान् पाणिनि ने उञ्छादि (अष्टा० ६।१।१६०) गण के वेगवेदवेष्टबन्धाः करणे गणसूत्र में घञन्त करणवाची वेद शब्द को अन्तोदात्त कहा है। करण अभिधेय से अन्यत्र घञन्त वेद शब्द आद्युदात्त होता है। यह अभिप्राय अर्थापत्ति से स्वतः प्राप्त होता है। इसी प्रकार अच् प्रत्ययान्त कर्तृवाचक वेदशब्द को चित्-प्रत्ययान्त होने से चितः (अष्टा० ६।१।१६३) नियम से अन्तोदात्तत्व प्राप्त होता था, उसे हटाकर आद्युदात्तत्व का विधान करने के लिये पाणिनि ने वृषादि गण (अष्टा० ६।१।२०३) में वेदशब्द का पाठ किया है।

इस निबन्ध में मीमांस्यमान ज्ञानपर्याय आद्युदात्त वेद शब्द है। यही ज्ञानपर्याय वेद शब्द आधार और आधेय में अभेद के उपचार से[1] ज्ञान के आधारभूत ग्रन्थों में भी प्रयुक्त होता है। यद्यपि सामान्य यौगिक अर्थ की अपेक्षा से वेदशब्द का प्रयोग ग्रन्थमात्र में होना चाहिये, तथापि पङ्कज आदि शब्दों के

---

१. जैसे 'मञ्चाः क्रोशन्ति' वाक्य में मञ्च (=मचान) शब्द मञ्चस्थ (=मचान पर बैठे हुये) पुरुषों के लिये प्रयुक्त होता है।

समान श्रेष्ठतम आद्य ज्ञान के आधारभूत ऋगादि कतिपय ग्रन्थों में ही प्रयुक्त होता है, यह सर्वसम्मत सिद्धान्त है।

वेद शब्द किन-किन ग्रन्थों का वाचक है, इस विषय में बहुत काल से विद्वानों में मतभेद चला आ रहा है।[1] यथा—

कुछ लोग '**मन्त्रसंहिताएं ही वेदपदवाच्य हैं**' ऐसा कहते हैं।[2]

दूसरे '**मन्त्र और ब्राह्मण दोनों का नाम वेद है**' ऐसा मानते हैं।[3]

अन्य '**आरण्यक और उपनिषद् ग्रन्थों का भी वेद में समावेश**' स्वीकार करते हैं।[4]

कतिपय '**कल्पसूत्र और मीमांसासूत्रों का भी वेदत्व**' मानते हैं।[5]

---

१. वस्तुतः हमारी दृष्टि में उपर्युक्त मतों में कोई विरोध नहीं है, इनमें प्रथम अर्थ मुख्य है, और शेष तत्तद् ग्रन्थों के जो पारिभाषिक अर्थ हैं, वे उन्हीं ग्रन्थों में ग्राह्य हैं।

२. '**मन्त्रब्राह्मणयोर्वेदनामधेयम्**' आपस्तम्ब सूत्र की व्याख्या में हरदत्त और धूर्तस्वामी दोनों ने लिखा है—**कैश्चिन्मन्त्राणामेव वेदत्वमाश्रितम् (आख्यातम्)**। इसी प्रकार स्वमी दयानन्द सरस्वती ने भी मन्त्र संहिताओं की ही वेदसंज्ञा मानी है। द्र०—ऋग्वेदादि-भाष्य-भूमिका वेदसंज्ञाविचार प्रकरण।

३. '**मन्त्रब्राह्मणयोर्वेदनामधेयम्**' ऐसा वचन कृष्ण यजुर्वेद के सभी श्रौत-सूत्रकारों ने पढ़ा है। इसी प्रकार '**मन्त्रब्राह्मणयोर्वेदशब्दः**' कौषीतकि गृह्यसूत्र (३।१२।२३) का वचन है।

४. आचार्य सायण ने ऋग्वेदभाष्य की उपक्रमणिका में उपनिषद् पर्यन्त ग्रन्थों की वेदसंज्ञा मानी है।

५. **विधिर्विधेयस्तर्कश्च वेदः** (पार० गृह्य २।६।५) सूत्र के व्याख्यान में भर्तृयज्ञ ने '**तर्क**' का अर्थ '**कल्पसूत्र**' किया है। कल्पतरुकार ने '**मीमांसा**' लिखा है (द्र०—गदाधरटीका)। विश्वनाथ ने **न्यायसूत्र** का भी वेदत्व माना है। वह उक्त सूत्र की व्याख्या में लिखता है—'**तर्को न्यायमीमांसे**'।

अन्य **'षडङ्गों (छह वेदाङ्गों) का भी वेद में अन्तर्भाव'** चाहते हैं।[1]

इस प्रकार वेद शब्द के अनेक अर्थ भिन्न-भिन्न आचार्यों ने स्वीकार किये हैं, उनमें कौनसा अर्थ मुख्य है, और कौनसा गौण, यह विचार उत्पन्न होता है।

दो ही अर्थों की विचारार्हता

उक्त पांच अर्थों में आद्य दो अर्थ ही विचारने योग्य हैं। तृतीय पक्ष स्वीकार करने वाले भी आरण्यक और उपनिषद् का ब्राह्मणग्रन्थों में अन्तर्भाव मानते हैं। अतः यह मत भी द्वितीय मत के अन्तर्गत आ जाता है। चतुर्थ पक्ष पारस्कर गृह्यसूत्र के किन्हीं व्याख्याताओं द्वारा ही स्वीकृत है। पञ्चम मत तो गृह्यकार ने स्वयं अन्य-मत के रूप में ही उपस्थित किया है। इस प्रकार आद्य दो ही पक्ष विचारणीय रहते हैं। अतः इन दोनों में वेद शब्द का कौनसा अर्थ मुख्य है, और कौनसा गौण है, यह विचार किया जाता है।

यत्परः शब्दः स शब्दार्थः—इस न्याय से शब्द का जो अर्थ अपरिभाषित (=विशेष वचन द्वारा अप्रकाशित) होने से स्वाभाविक होता है, वह मुख्य होता है। और जो किसी वचन विशेष द्वारा परिभाषित (कथित) होने से कृत्रिम होता है, वह गौण कहाता है। इसी प्रकार साहचर्यादि[2] निमित्तों से जो विशेषार्थ जाना जाता है, वह भी नैमित्तिक होने से गौण होता है। यह सर्वसम्मत सिद्धान्त है।

इस प्रकार प्रधान और गौण अर्थ के सर्वसम्मत लक्षण के अनुसार वेद शब्द के उक्त दो अर्थों में से कौनसा अपरिभाषित अर्थात् स्वाभाविक है और कौनसा किसी वचनविशेष द्वारा बोधित है, यह जिज्ञासा उत्पन्न होती है।

ऋक्, यजुः और **साम** के मन्त्रों को पढ़ते हुये अध्येता वा श्रोता कहते हैं—

---

१. **विधिर्विधेयस्तर्कश्च वेदः, षडङ्गमेके** (पार० गृह्य २।६।५, ६) इन सूत्रों की गदाधर की व्याख्या भी द्रष्टव्य है।

२. द्रष्टव्य न्यायदर्शन २।२।६१॥ यहां साहचर्यादि १० कारण उदाहरण सहित व्याख्यात हैं।

ऋग्वेद का अध्ययन किया जाता है, **यजुर्वेद का अध्ययन** किया जाता है, **साम-वेद का अध्ययन** किया जाता है। ऋक्, यजुः और साम संहिताओं की वेदसंज्ञा के लिये आज तक किसी ने भी प्रयत्न नहीं किया। ब्राह्मणग्रन्थों वा उपनिषद् ग्रन्थों के अध्ययन के लिये **ब्राह्मण का अध्ययन** किया जाता है, **उपनिषद् का अध्ययन** किया जाता है, इस प्रकार सामान्य रूप से अथवा **ऐतरेय का अध्ययन** किया जाता है, **बृहदारण्यक का अध्ययन** किया जाता है, इस प्रकार नामनिर्देशपुरःसर कथन किया जाता है। इनके लिये कोई भी यह नहीं कहता कि ऋग्वेद का अध्ययन करता हूं, यजुर्वेद का अध्ययन करता हूं। ब्राह्मणग्रन्थों के वेदत्व के ज्ञापन के लिये **'मन्त्रब्राह्मणयोर्वेदनामधेयम्'** ऐसे अनेक सूत्र प्राचीन ग्रन्थकारों ने बनाये हैं। इस प्रकार के सूत्रों का प्रयोजन विचारणीय है।

यदि यह कहा जाये कि 'ब्राह्मणों के साथ मन्त्रों का भी वेदत्व कहना इसका प्रयोजन है, केवल ब्राह्मणों का नहीं', यह सम्भव हो सकता है, परन्तु जहां इस परिभाषा की अथवा विशेष सञ्ज्ञा की प्रवृत्ति नहीं होती, वहां वेद शब्द से मन्त्रों का ही ग्रहण होने और ब्राह्मणों का ग्रहण न होने से जाना जाता है कि वेद पद का स्वाभाविक अर्थात् मुख्य अर्थ मन्त्र ही है, न कि ब्राह्मण भी। इसमें निम्न कारण हैं—

मन्त्र और ब्राह्मण दोनों की वेद संज्ञा कल्प-सूत्रकारों ने कही है। कल्प-सूत्रकारोक्त वेद संज्ञा को ब्राह्मणग्रन्थों में प्रवृत्त नहीं कर सकते, क्योंकि दोनों में काल की भिन्नता और स्थिति की भिन्नता है।[1] इसलिये ब्राह्मण-ग्रन्थों में

---

१. **पाश्चात्य मतानुसार** ब्राह्मण-ग्रन्थों और कल्पसूत्रों के प्रवचनकाल में भेद है। ब्राह्मणग्रन्थों का प्रवचन पौर्वकालिक है और कल्पसूत्रों का आपर-कालिक। उत्तरकाल में विरचित नियम पूर्वकाल के ग्रन्थों में व्यवहृत नहीं हो सकते। अतः ब्राह्मण-वचनों में जहां जहां वेद शब्द आया है, वहां-वहां वेद के अन्तर्गत ब्राह्मणों का समावेश नहीं हो सकता। जो **मध्यकालीन भारतीय वैदिक** ब्राह्मण-ग्रन्थों को भी मन्त्रों के समान अपौरुषेय मानते हैं, उनके मत

जहां कहीं वेद शब्द उपलब्ध होता है, वहां यह विचाचणीय हो जाता है कि उसका क्या अर्थ है, अर्थात् ब्राह्मण-ग्रन्थों में पठित 'वेद' शब्द केवल मन्त्र का ही बोधक है, अथवा मन्त्र-ब्राह्मण दोनों का। इसके निश्चय के लिये हम कतिपय-ब्राह्मण वचन उद्धृत करते हैं —

तानि ज्योतींष्यभ्यतपन्, तेभ्योऽभितप्तेभ्यस्त्रयो वेदा अजायन्त। ऋग्वेद एवाग्नेरजायत यजुर्वेदो वायोः सामवेद आदित्यात्……स ऋचैव होत्रमकरोत् यजुषाध्वर्यवं साम्नोद्गीथमिति। ऐ० ब्रा० ५।३२॥

यहां उपक्रम में वेद शब्द का प्रयोग है और उपसंहार में ऋक् यजुः और साम शब्दों का। ऋक् यजः साम मन्त्रों के ही वाचक हैं[1] यह सर्वसम्मत सिद्धान्त है। उपक्रम और उपसंहार में एकवाक्यता होनी चाहिये। इसलिये उपक्रम में प्रयुक्त वेदरूपी विशिष्ट शब्द भी मन्त्रों के ही वाचक हो सकते हैं। ब्राह्मणों का भी उनमें अन्तर्भाव है, ऐसा नहीं कहा जा सकता। यहां यह भी ध्यान रहे कि यज्ञों में मन्त्रों का ही प्रयोग होता है, ब्राह्मण-वचनों का प्रयोग नहीं होता।[2] अतः **स ऋचव होत्रमकरोत्** इत्यादि ऋक् यजुः साम का अभिप्राय तत्तत्संज्ञक मन्त्रों से ही है, न कि ब्राह्मण-वचनों से भी।

में ब्राह्मण-ग्रन्थों और कल्पसूत्रों में **काल-वैषम्य** और **स्थिति-वैषम्य** दोनों है। क्योंकि कल्पसूत्र पौरुषेय हैं, यह मीमांसाशास्त्र प्रतिपादित सर्वसम्मत सिद्धान्त है।

१. द्रष्टव्य—**यत्रार्थवशेन पादव्यवस्था सा ऋक्, गीतिषु सामाख्या, शेषे यजुःशब्दः।** मीमांसा २।१।३५, ३६, ३८॥

२. '**विनियोजकं ब्राह्मणं भवति**' (द्र०—तै० सं० भट्टभास्कर-भाष्य, भाग १, पृष्ठ ३, मैसूर सं०) इस याज्ञिकलक्षणानुसार ब्राह्मण मन्त्रों के तत्तत्कर्मों में विनियोगमात्र दर्शाते हैं। विनियोग से शेष ब्राह्मणवचन अर्थवाद कहाते हैं। अर्थवाद स्तुति आदि के द्वारा विधिवाक्य से ही सम्बद्ध होते हैं। यह मीमांसकों का सिद्धान्त है।

इसी अर्थ को सुदृढ़ करने के लिये मीमांसा-भाष्यकार शबरस्वामी द्वारा उद्धृत निम्न ब्राह्मण-वचन भी द्रष्टव्य है—

तेभ्यस्तेपानेभ्यस्त्रयो वेदा अजायन्त। अग्नेर्ऋग्वेदो वायोर्यजुर्वेद आदित्यात् सामवेद........। उच्चैर्ऋचा क्रियत उच्चैः साम्नोपांशु यजुषा इति। द्र०—शाबरभाष्य मी० ३।३।२॥

यहां पर भी उपक्रम में वेद विशिष्ट शब्द प्रयुक्त हैं और उपसंहार में केवल ऋक् यजुः और साम शब्द। परन्तु यहां पर यह ध्यान रखना चाहिये कि ऋक् यजुः और साम का जो उच्चैस्त्व और उपांशुत्व धर्म बताया है, वह उन-उन वेदों में पठित मन्त्रों का हा है, न कि उन वेदों के ब्राह्मण-वचनों का भी, यह सर्वसम्मत राद्धान्त है। इसलिये इस प्रकार के वचनों में, ब्राह्मण-ग्रन्थों का वेदत्व स्वीकार करनेवाले याज्ञिक भी यहां वेदशब्द का प्रयोग होने पर भी ब्राह्मणों का ग्रहण नहीं मानते।[१]

